# Chittasantoshatrimshika

लोकोत्तरानुभवसस्मितघूर्णमान-
स्वानन्द सुन्दर विनिर्मल निर्निमेषा।
यत्स्फारतः पशुरपीश्वरतां प्रयाति
सा कापि दृग् विजयते गुरुपुङ्गवानाम्॥ १ ॥

दिष्ट्या भवानलशिखाशततापतप्तं
जन्माटवीषु विषमासु कदर्थितं यत्।
चेतस्तदेतदधुनाऽमलचित्सुधाब्धि-
मध्ये निमग्नमसमां भजते प्रशान्तिम्॥ २ ॥

व्यामूढमन्दमिव संशयदोषदुष्टं
चेतो यदेतदभवद् भवदुःखपात्रम्।
जातं तदद्य गुरुपादसरोजसेवा-
सञ्जातनिर्मलविबोधमहाप्रकाशम्॥ ३ ॥

सङ्कोचमाश्रितवतो निबिडं विमोहात्
यस्याभवद् भयमिहेन्द्रियपन्नगेभ्यः ।
चेतस्तदाप्य विमलोर्जितसंविदाज्ञां
निःशङ्कमद्य रमते विषयाटवीषु ॥ ४ ॥

कन्दर्पबाणविषमं हरिणेक्षणाभिः
पीतं हतं कबलितं मुषितं यदासीत् ।
तत्पात्रतामुपगतं परमोक्षलक्ष्मी-
प्रेमामृताप्लुतकटाक्षपरम्पराणाम् ॥ ५ ॥

क्लिष्टं यदेतदभवज्जपकष्टयोग-
प्राणप्रवाहविनिरोधकदर्थनाभिः ।
चेतस्तदद्य परमाद्वयसामरस्य-
सञ्जातसम्मदरसासवमत्तमास्ते ॥ ६ ॥

यो भेदतीव्रशिशिरप्रसरोपघात-
भीतो मनोमधुकरो हतशक्तिरासीत् ।

आसाद्य सोऽद्य शिवधाममधुं सदास्ते
संविल्लताकुसुमसौरभपानमत्तः ॥ ७ ॥

त्यक्तस्वतन्त्रनिजरूपमहाप्रभावं
यत्कर्मबिन्दुधरणीषु विलीनमासीत् ।
स्वच्छप्रभाप्रसरपूरितसर्वलोकं
चेतश्चिदम्बरपदेन तदद्य माति ॥ ८ ॥

यत्नेन वाञ्छितमनल्पविकल्पजाल-
विघ्नैस्तिरस्कृतमवाप न यत्प्रवेशम् ।
दुर्भेदभग्नविषमार्गलभिन्नमार्गं
चेतस्तदद्य रमते शिवमन्दिरान्तः ॥ ९ ॥

योगव्रतादिनियमैरुपसेवितापि
नावाप दर्शनपथं किल यस्य जातु ।
संवित्प्रिया सुभगमूर्जितभाग्यसम्प-
च्चेतस्तदद्य न जहाति मुहूर्तमेकम् ॥ १० ॥

दुःखैकसार इति भीम इति प्रयत्नात्
संसार एष किल यस्य बभूव हेयः ।
दिष्ट्या स एव परचिद्रससामरस्य-
सञ्जीवितः श्रयति तस्य विमुक्तिसाम्यम् ॥ ११ ॥

तृष्णाकरालकरवालविलुप्यमानं
यद्विस्मृतात्मविभवं कृपणं बभूव ।
उच्चैरकिञ्चनतयापि तदद्य चेतः
स्वात्मावमर्शपरहर्षमुदारमास्ते ॥ १२ ॥

कस्योर्जितस्य सुकृतस्य फलं तदेतत्
पुण्योदयस्तव कुतोऽप्यमनन्यलभ्यः ।
संविच्छ्रिया गलितभेदविकल्पया यत्
एकं मुहूर्तमपि नैव विमुच्यते त्वम् ॥ १३ ॥

वर्तामहे क्वचन नाम न चित्त दिष्ट्या
वर्धामहे वयमहो मुदिता भवामः ।

यत्त्वां सखे परनिरुत्तरशैवसंपत्
सम्भोगमन्थरतरं परिलोकयामः ॥ १४ ॥

ध्यानेऽर्चनेऽपि च कदाचन काञ्चनापि
कुत्रापि निर्वृतिदिशां बत यन्न लेभे ।
दिष्ट्या निमग्नमपि संव्यवहारमध्ये
चेतस्तदद्य न विमुञ्चति पारिपूर्ण्यम् ॥ १५ ॥

सर्वेषु चित्तमधुपो विषयद्रुमेषु
बभ्राम यः सततमस्ति मिताभिलाषः ।
दैवादवाप्य परमेश्वरपारिजातं
तृप्तो विलीन इव मुञ्चति चञ्चलत्वम् ॥ १६ ॥

यैरिन्द्रियैरतिवशीकृतशक्ति चेतः
पूर्वं कदर्थितमभूरहितैरिवोच्चैः ।
स्वच्छानिकेतपरचिद्रससंविभक्तैः
दिष्ट्याद्य तैरनुचितैरिव राजसे त्वम् ॥ १७ ॥

चिन्तां ततान करुणं प्रललाप पूर्वं
यत्सङ्कुचत् स्थितिभयं रविजाद्विचार्य ।
चेतस्तदद्वयमिदं निजरूपमीक्ष्य
दिष्ट्याद्य निर्भयममन्दमुदात्तमास्ते ॥ १८ ॥

नित्यं यदेतदभवद्विफलप्रयासं
हेवाकदुर्ललितमप्रथितात्मभावम् ।
संवित्सुधारसचमत्कृतिघूर्णमानं
दिष्ट्या तदद्य नितरां स्पृहणीयमास्ते ॥ १९ ॥

चिन्ताशताकुलतरं न रतिं कदाचित्
भीतं भवादभजतैकमपि क्षणं यत् ।
चेतश्चिदात्मकमिदं सकलं विलोक्य
सुप्तप्रबुद्धमिव निर्वृतरूपमास्ते ॥ २० ॥

वन्दामहे किमु नुमः किमु गौरवेण
हर्षेण चित्त किमु नाम निपीडयामः ।

सम्प्राप्तदुर्लभमहोदयशैवसम्पत्
त्वां कौतुकेन किमु मित्र विलोकयामः ॥ २१ ॥

आपृच्छतामियमनादिघनप्रबोध
स्नेहानुविद्धहृदया हृदयाद्य माया ।
संसेव्यतां सुभगशैवपदप्रवेश-
संप्राप्तदुर्लभमहोदयमुक्तिलक्ष्मीः ॥ २२ ॥

किं ब्रूमहेऽत्र भवते सुकृतेन सत्ये
सर्वाशिषामविषये ननु वर्तसे त्वम् ।
यत्कारणातिगतनिर्मलनिर्विकल्प-
स्वच्छन्दशङ्करपदे भजसेऽनुरागम् ॥ २३ ॥

चित्रं त्वदेतदसमं यदभूत् सुखेषु
प्राप्तेषु निर्वृतिदिशामनुवर्तमानम् ।
दुःखेषु दुःसहतरेष्वपि चित्तमद्य
पूर्णप्रमोदरसनिर्भरमेतदास्ते ॥ २४ ॥

विश्वं निगीर्य सहसा कवलं विधाय
कालं प्रशान्तगगनोपमदिव्यमूर्तिः।
या राजते निरुपमामृतपूरपूर्णा
सा कापि खेचरगतिर्जयति त्वदीया ॥ २५ ॥

ते कारणाधिपतयः प्रलयं प्रयान्ति
यस्मिन् महावटतटे विषमे गभीरे।
शक्तिर्निजं वपुरपि प्रसभं जुहोति
तद्धाम संश्रयसि वीरवर त्वमेकम् ॥ २६ ॥

विद्युद्विलासचपले विभवे नताङ्गी-
भ्रूभङ्गभङ्गुरतरेऽपि च जीवनेऽस्मिन्।
चित्त त्वयैव विजितं श्रयताऽविनाशि
दिग्देशकालकलनारहितं पदं तत् ॥ २७ ॥

स्वस्त्यस्तु तेऽम्बरविकस्वरसम्प्रदाय-
सम्प्राप्तशङ्करपदोदितसम्मदाय।

दुर्वारसंसृतिदशास्वपि निर्विकार-
नित्योदितात्मविभवाय भवाभवाय ॥ २८ ॥

स्वच्छन्दनिर्मलसदोदितनिर्निकेत-
संवित्सुधारसचमत्कृतिनिर्भरोऽस्मि ।
दिष्ट्याद्य सद्गुरुमुखाम्बुजमध्यलब्धा-
नुच्चार्य चारुकथनोदय विस्मितोऽस्मि ॥ २९ ॥

भवमरुभुवि श्रान्तो मोहाद्य एष मनोऽध्वगो
विषमविषयप्रोद्यत्तृष्णानिवेशवशीकृतः ।
शिवपदसुधासिन्दुं दैवादवाप्य स सादरं
किमपि सुखितो मज्जं मज्जं निमज्जति ॥ ३० ॥

निरावरणचिद्व्योमपरमामृतबृंहितः ।
नागाभिधो व्यधादेनां चित्तसन्तोषत्रिंशिकाम् ॥ ३१ ॥

॥ इति श्रीमहामाहेश्वराचार्यवर्य श्रीनागार्जुनविरचिता चित्तसन्तोषत्रिंशिका ॥

www.kamakotimandali.com